दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-253 | 1 | जुलाई 05, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् आषाढ़कृष्णपञ्चमी
आषाढः 21 प्रविष्टांशः मङ्गलमयः भवेत्

2 प्रधानमन्त्री राजस्थाने पञ्चोत्तर-एकलक्षकोटिरूप्यकाणां (१,०५,००० कोटि) अधिकानां विकासपरियोजनानाम् उद्घाटनं शिलान्यासं च अकरोत्

3 मादकद्रव्याणां याचनां न्यूनीकर्तुं सामाजिक-न्यायाधिकारितामन्त्रालयेन राष्ट्रियकार्ययोजना आरब्धा

5 भाजपा-दलस्य मिथ्याप्रचारस्य प्रखर-उत्तरं दास्यति काङ्ग्रेसदलम्, २०२७ तमे वर्षे भाजपा-विधायकानां सङ्ख्या भूयः न्यूनीभविष्यति

## प्रधानमन्त्री नरेन्द्रमोदी गुजरातराज्ये अर्धचालक-संयोजन-परीक्षण-केन्द्रस्य उद्घाटनम् अकरोत्




**हिमसंस्कृतवार्ता।** प्रधानमन्त्री नरेन्द्रमोदी गुजरातस्य साणन्दे 'इण्डिया सेमीकंडक्टर मिशन' (भारत-अर्धचालक-अभियानम्) इत्यस्मै प्रोत्साहनं यच्छन्, 'सीजी सेमी आउटसोर्स्ड सेमीकंडक्टर संयोजन एवं केंद्र' (अर्धचालक-संयोजन-परीक्षण-केन्द्रस्य) उद्घाटनम् अकरोत्। सार्धसप्तसहस्रकोटिरूप्यकाणाम् (७,५०० कोटि) अधिकानां निवेशेन निर्मितम् एतत् केन्द्रं देशस्य प्रौद्योगिकी-निर्माण-यात्रायां कश्चन महत्त्वपूर्णः सोपानः वर्तते। साणन्दं प्राप्य प्रधानमन्त्री अस्य 'हाई-टेक' (उच्च-प्रौद्योगिकी) यन्त्रागारस्य (प्लांट) भ्रमणं कृत्वा तस्य निरीक्षणम् अकरोत्। प्रधानमन्त्री अभियन्तृभिः चालकैः (ऑपरेटर्स) च सह अपि विस्तरेण संवादं कृतवान्।पूर्णरूपेण क्रियाशीलते सति, अस्य केन्द्रस्य वार्षिकी उत्पादनक्षमता पञ्चअर्बुदं (५ बिलियन) सेमीकंडक्टर-चिप्स (अर्धचालक-शकलाः) भविष्यति। अनेन स्मृति-सञ्चय-समाधानानां (मेमोरी एण्ड स्टोरेज सोल्यूशन्स) वर्धमानायाः वैश्विकमाङ्गल्यस्य पूर्त्यै अपि साहाय्यं मिलिष्यति। अस्मिन् अवसरे इलेक्ट्रॉनिक्स-सूचनाप्रौद्योगिकीमन्त्री अश्विनीवैष्णवः अवदत् यत् अस्मिन् यन्त्रागारे निर्मितानां चिप्स-शकलानाम् उपयोगः कार-यानेषु, स्कूटर-यानेषु तथा च बहुविधेषु औद्योगिककार्येषु भविष्यति। सः अकथयत् यत् अस्मिन् केन्द्रे निर्मिताः चिप्स-शकलाः जापान-अमेरिका-यूरोपदेशान् प्रति प्रेषयिष्यन्ते, अनेन च भारतीयप्रौद्योगिकी विश्वभरे ख्यातिं प्राप्स्यति। सः अवदत् यत् प्रधानमन्त्रिणः प्रयासैः एव एषा सफलता प्राप्ता।

## वैश्विक-शान्ति-अभियानेषु भारतस्य दीर्घकालिक-योगदानस्य महती मान्यता



वैश्विक-शान्ति-अभियानेषु भारतस्य दीर्घकालिक-योगदानं प्रति एका महती मान्यता प्राप्ता। काङ्गो-लोकतान्त्रिक-प्रजातन्त्रस्य (डीआरसी) स्थायि-प्रचालन-स्थाने 'साके' इत्यत्र आयोजिते एकस्मिन् औपचारिक-पदक-परेड-समारोहे संयुक्तराष्ट्रस्य अधीने सेवारताः ६५१ (षट्शत-एकपञ्चाशत्) भारतीयसेनायाः कर्मचारिणः प्रतिष्ठित-संयुक्तराष्ट्र-पदकेन समादृताः। एतानि पदकानि ह्यः आयोजिते एकस्मिन् समारोहे प्रत्तानि, यस्मिन् संयुक्तराष्ट्र-शान्ति-अभियानानां अन्तर्गतं भारतीयदलस्य व्यावसायिकता, प्रचालन-उत्कृष्टता, समर्पितसेवा च सम्मानिता अभवत्। अस्मिन् कार्यक्रमे काङ्गो-देशे संयुक्तराष्ट्र-सङ्गटन-स्थिरीकरण-मिशन - 'मोनुस्को' (MONUSCO) इत्यस्य वरिष्ठाः अधिकारिणः, बल-मुख्यालयस्य (फ़ोर्स हेडक्वार्टर) प्रतिनिधयः, सैन्य-कमाण्डराः, अन्ये च विशिष्टाः अतिथयः उपस्थिताः आसन्।

## एथेनॉल-मिश्रण-कार्यक्रमः चरणबद्धरूपेण वैज्ञानिक-रीत्या च प्रचालितप्रक्रियया कार्यान्वितः - उद्योगजगतः



उद्योगजगतः विशेषज्ञैः कथितं यत् एथेनॉल-मिश्रण-कार्यक्रमः रात्रौ एव (अकस्मात्) न कार्यान्वितः, अपितु एकया सुनियोजितया, चरणबद्धया, वैज्ञानिकरीत्या च प्रचालितप्रक्रियया अयं प्रवर्तितः अस्ति। नवदिल्ल्यां एकं संवाददातृ-सम्मेलनं सम्बोधयन्ती इंजीनियर्स इण्डिया लिमिटेड इत्यस्य पूर्व-अध्यक्षा प्रबन्धनिदेशिका च वर्तिका शुक्ला अवदत् यत् एथेनॉल-मिश्रण-कार्यक्रमः २०१८ तमे वर्षे संरचितचर्चायाः हितधारकाणां परामर्शस्य च कृते सार्वजनिकक्षेत्रे स्थापितः आसीत्। सा अकथयत् यत् अस्य प्रयासस्य कृते वैज्ञानिकप्रमाणानाम्, वाहननिर्मातृभिः (ऑटोमोबाइल-निर्मातृभिः) कृतानां व्यापकानां परीक्षणानाम्, भारतीय-ऑटोमोटिव-अनुसन्धान-सङ्घस्य, भारतीय-ऑटोमोबाइल-निर्मातृ-समितेः च समर्थनं प्राप्तम् अस्ति।

**E-10 वाहनेषु E-20 इन्धनस्य प्रयोगः**

E-10 वाहनेषु E-20 इन्धनस्य प्रयोगविषये मारुति-सुजुकी-संस्थायाः वरिष्ठः कार्यकारी अधिकारी राहुल भारती अवदत् यत् मारुति-संस्थया अस्य आन्तरिकं परीक्षणं कृतम्। परीक्षणे कस्यापि प्रकारस्य चिन्तायाः विषयः सम्मुखं न आगतः। सः अकथयत् यत् २०२३ तमात् वर्षात् विक्रीतानि सर्वाणि वाहनानि पूर्णरूपेण E-20 इन्धन-अनुकूलानि सन्ति। श्री भारती महोदयः अवदत् यत् पुरातनानि E-10 वाहनानि अपि E-20 इन्धनस्य सुरक्षितरूपेण उपयोगं कर्तुं शक्नुवन्ति। वाहनेषु कस्यापि प्रकारस्य भङ्गम (टूट-फूट), अयोमलं (जंग लगना), अथवा कार-यानस्य जीवनकालस्य क्षतिः इत्यादिः कापि समस्या नास्ति।

## संसदः वर्षाकालीनं सत्रं अस्मात् मासात् विंशति (२०) दिनाङ्कात् आरप्स्यते



संसदः वर्षाकालीनं सत्रं (मानसून सत्र) अस्मिन् मासे विंशतितमे (२०) दिनाङ्के आरप्स्यते, अगस्त-मासस्य त्रयोदश (१३) दिनाङ्कं यावत् च प्रचलति। संसदीय-कार्य-मन्त्री किरेन रिजिजू महोदयः अज्ञापयत् यत् राष्ट्रपतिः द्रौपदी मुर्मु महोदया २० जुलाई-दिनाङ्कात् संसदः वर्षाकालीनं सत्रम् आह्वातुं सर्वकारस्य प्रस्तावं स्वीकृतवती अस्ति।एकस्मिन् सामाजिक-माध्यम-सन्देशे (सोशल मीडिया पोस्ट) श्री रिजिजू महोदयः अवदत् यत् अस्मिन् सत्रे राष्ट्रियमहत्त्वस्य विषयेषु सार्थिकायां चर्चायां, वादे, निर्णयग्रहणे च विशेषं अवधानं केन्द्रीकृतं भविष्यति।

## सुभाषितम्

**आयुष्यं सर्वथा रक्ष्यं,**
**प्राणिनामिह धीमता।**
**अप्यल्पगुणसम्पन्नो,**
**जीवन्भद्राणि पश्यति।।**

अर्थात्- इस संसार में दीर्घायु की कामना से अपने शरीर की रक्षा करने की बुद्धि सभी प्राणियों में होती है, चाहे वह प्राणी बहुत ही कम गुणों से संपन्न हो, फिर भी अपने जीवनकाल में सुख और समृद्धि की ही कामना करता है।

हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यावहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## गृह मन्त्रालयेन पाकिस्ताने स्थिताः त्रयोविंशतिः (२३) जनाः 'यूएपीए' (UAPA) अन्तर्गतं आतङ्कवादिनः घोषिताः




गृह मन्त्रालयेन पाकिस्ताने स्थिताः त्रयोविंशतिः (२३) जनाः 'अनियमविरुद्ध-गतिविधयः निवारण-प्रावधानम्' (यूएपीए) अन्तर्गतं आतङ्कवादिनः इति घोषिताः सन्ति। एते जनाः जैश-ए-मोहम्मद, लश्कर-ए-तैयबा इत्यादिभिः अन्यसङ्घटनैः च सह सम्बद्धाः आसन्। मन्त्रालयेन कथितं यत् देशस्य नागरिकाणां च सुरक्षायै सर्वकारः प्रत्येकम् आतङ्कवादी-सञ्जयम् उन्मूलयितुं कटिबद्धः वर्तते। यूएपीए (UAPA) अधिनियमे संशोधनं शक्तयः च 'यूएपीए' अधिनियमे संशोधनेन केन्द्रसर्वकारस्य अन्वेषणसंस्थानां च शक्तीनां विस्तारं कृत्वा देशस्य आतङ्कवाद-विरोधि-कानूनी-तन्त्रं सुदृढीकृतम्। अनेन संशोधनेन केन्द्रसर्वकारः सङ्गटनानां सहैव वैयक्तिकरूपेण जनान् अपि आतङ्कवादिनः इति घोषितुं पूर्णम् अधिकारं प्राप्तवान् अस्ति।

# प्रधानमन्त्री राजस्थाने पञ्चोत्तर-एकलक्षकोटिरूप्यकाणां (१,०५,००० कोटि) अधिकानां विकासपरियोजनानाम् उद्घाटनं शिलान्यासं च अकरोत्




**हिमसंस्कृतवार्ता।** प्रधानमन्त्री नरेन्द्रमोदी राजस्थानस्य पचपदरायां पञ्चोत्तर-एकलक्षकोटिरूप्यकाणां (१,०५,००० कोटि) अधिकानां विकासपरियोजनानाम् उद्घाटनं शिलान्यासं च अकरोत्। एतत् राज्ये अवसंरचना-ऊर्जा-परिवहन-रोजगारसृजनेषु एकस्य महत्त्वपूर्णस्य उपलब्धेः परिचायकं वर्तते। स्वस्य एकदिवसीययात्रायाः समये प्रधानमन्त्री जोधपुरविमानपत्तने नवीनस्य टर्मिनलभवनस्य उद्घाटनं कृतवान्। अतः परं सः बालोतरामण्डलस्य पचपदरायां देशस्य आधुनिकतमां 'ग्रीनफील्ड' परिष्कारशालां (रिफाइनरी) सह-पेट्रोकेमिकल-संयन्त्रं च राष्ट्राय समर्पितवान्। सः परिष्कारशालायाः आधुनिकतमस्य नियन्त्रणकक्षस्य निरीक्षणम् अपि अकरोत्। श्रीमोदी अभियन्तृभिः प्राविधिकविशेषज्ञैः च सह संवादम् अपि अकरोत्। श्रीमोदी इन्धनवाहनं (टैंकर) हरितपताकां प्रदर्श्य प्रस्थापितवान्। प्रधानमन्त्री जयपुरमेट्रो-द्वितीयचरणाय आभासी-माध्यमेन (वर्चुअल) शिलान्यासम् अकरोत्। 'ग्रीनफील्ड' परिष्कारशाला तैल-वाष्प-खनिजानां कृते तादृशः एकः औद्योगिकप्रसंस्करणसंयन्त्रः भवति, यः अविकसितायां स्वच्छायां भूमौ सर्वथा नवीनरूपेण निर्मितः भवति।

सभां सम्बोधयन् प्रधानमन्त्री अवदत् यत् पश्चिमेशियायाः सङ्घर्षेण २१ शताब्द्याः बृहत्तमः ऊर्जासङ्कटः जातः। सः कथयामास यत् भारतस्य समयानुसारं कृतेन निर्णयेन, प्रभावशालिन्या रणनीत्या, राष्ट्रियसंसाधनानां विवेकपूर्णप्रबन्धनेन च देशः अस्मात् सङ्कटात् मुक्तुं समर्थः अभवत्। प्रधानमन्त्री अवदत् यत् यत्र बहवः देशाः इन्धनन्यूनतया युध्यन्ते स्म, तत्र भारतेन सङ्कटस्य सटीकम् आकलनं कृतम्, एका प्रभावशालिनी रणनीतिः रचिता, देशस्य ऊर्जासुरक्षायाः रक्षणाय च स्वस्य राजनयिकशक्तेः उपयोगः कृतः।

श्रीमोदी अवदत् यत् अस्मिन् सङ्कटकाले मित्रदेशैः सह भारतस्य सुदृढैः राजनयिकसम्बन्धैः महती भूमिका निर्वूढा। सः अकथयत् यत् पूर्वं भारतं २५-२६ देशेभ्यः ऊर्जायाः आयातम् करोति स्म, परन्तु अस्मिन् सङ्कटकाले भारतेन अस्य विस्तारः प्रायः चत्वारिंशत् (४०) देशेषु कृतः। अनेन वैश्विकबाधासु सत्स्वपि इन्धनापूर्तिः निर्बाधा सुनिश्चिता अभवत्। श्रीमोदी अवदत् यत् देशस्य तस्य नागरिकाणां च हितं सर्वकारस्य सर्वोच्चप्राथमिकता स्थास्यति। सः अवदत् यत् भारतेन स्वस्य शोधनक्षमतायाः (रिफाइनिंग क्षमता) अपि विस्तारः कृतः। एतत् अधुना विश्वस्य चतुर्थं बृहत्तमं शोधनराष्ट्रं सञ्जातम्।

प्रधानमन्त्री अवदत् यत् वैश्विकसङ्कटे सत्यपि सर्वकारेण पाकवाष्पस्य (एलपीजी) मूल्येषु महतीं वृद्धिं रोधितम्। सः अकथयत् यत् अस्मात् सङ्कटात् एलपीजी-सिलिण्डरस्य मूल्यं प्रायः द्विसहस्ररूप्यकाणि यावत् भवितुम् अशक्नोत्, परन्तु प्रभावी-हस्तक्षेपेण एतत् सुनिश्चितं जातं यत् उपभोक्तारः प्रायः सार्धशतनव (९५०) रूप्यकेषु सिलिण्डरं प्राप्नुवन्तु। सः अवदत् यत् एप्रिलतः जूनमासपर्यन्तं तैलविपणन कम्पनीभिः पेट्रोल-डीजल-इन्धनयोः प्रायः पञ्चसप्ततिकोटिरूप्यकाणां (७५,००० कोटि) हानिः सोढा, यस्याः भारं सर्वकारेण नागरिकाणां कृते आन्तर्राष्ट्रियेन्धनस्य वर्धमानमूल्यानां प्रभावात् रक्षितुं स्वीकृतम्। श्रीमोदी अवदत् यत् ऊर्जासङ्कटकाले सर्वकारस्य प्रयासाः एकस्मिन् दिने इतिहासे अङ्किताः भविष्यन्ति। सः अवदत् यत् यत्र केचन जनाः वार्ताः प्रसारयितुं भयं च जनयितुं व्यस्ताः आसन्, तत्र अधिकारिणः निर्बाधम् ऊर्जापूर्तिं सुनिश्चितं कर्तुं धैर्येण, कठिनपरिश्रमेण, संवेदनशीलनीतिनिर्णयैः च सह अहोरात्रं कार्यं कुर्वन्तः आसन्। सः अस्मिन् कठिनायां स्थितौ सहयोगार्थं देशवासिनां प्रति कृतज्ञतां ज्ञापितवान्। श्रीमोदी तान् जनान् समालोचितवान् ये राष्ट्रस्य समर्थनस्य स्थाने सङ्कटस्य राजनीतीकरणस्य प्रयासम् अकुर्वन्। पश्चिमेशिया-यूक्रेनयोः सङ्घर्षकारणात् उत्पन्नायाः वैश्विक-उर्वरक-सङ्कटस्य उल्लेखं कुर्वन् सः अवदत् यत् यत्र बहुषु देशेषु यूरिया-मूल्यं प्रायः त्रिसहस्ररूप्यकाणि प्रतिस्यूतं (पर बोरी) अभवत्, तत्र सर्वकारेण एतत् सुनिश्चितं कृतं यत् भारतीयकृषकाः प्रायः त्रिशतरूप्यकाणि प्रतिस्यूतं दरेण यूरिया प्राप्नुवन्तु, येन ते वैश्विकमूल्यवृद्धितः सुरक्षिताः अभवन्। पचपदरा-परिष्कारशालायाः उल्लेखं कुर्वन् प्रधानमन्त्री एताम् भारतस्य एकस्य विकसितस्य आत्मनिर्भरस्य च राष्ट्रस्य निर्माणस्य दिशि एकाम् ऐतिहासिकपरियोजनाम् अवदत्। सः अवदत् यत् एषा परिष्कारशाला सहस्रशः जनेभ्यः रोजगारस्य अवसरान् जनयिष्यति, पश्चिमराजस्थाने च औद्योगिकविकासस्य महतीं प्रेरणां दास्यति। राज्यस्य युवकेभ्यः वर्धापनं दत्त्वा सः अवदत् यत् एषा परियोजना क्षेत्रे निवेशस्य आर्थिकविकासस्य च नूतनानि द्वाराणि उद्घाटयिष्यति। यात्रायाः समये आरब्धानाम् अन्यासां विकासयोजनानाम् उल्लेखं कुर्वन् श्रीमोदी अवदत् यत् जोधपुरविमानपत्तने नवनिर्मितं टर्मिनलबवनं मारवाड़क्षेत्रे पर्यटनं, व्यापारं, रोजगारं च वर्धयिष्यति। सः अवदत् यत् जोधपुरातः संशोधिता उड्डयनयोजना (उड़ान योजना) आरब्धा सती लघुशहरेषु दूरस्थक्षेत्रेषु च वायुसम्पर्कः सुदृढः भविष्यति। सः एतदपि अवदत् यत् राजस्थानस्य शेखावाटीक्षेत्रे जलसङ्कटस्य निवारणाय दीर्घकालिका प्रतीक्षा अधुना समाप्ता भविष्यति, सः च नूतनविकासपरियोजनाभ्यः जनान् अभिनन्दितवान्। सः राजस्थानस्य चिरकालीनानां जलसमस्यानां समाधाने असफलायाः पूर्वतनकाङ्ग्रेससर्वकारस्य आलोचनाम् अकरोत्। श्रीमोदी अवदत् यत् वर्तमानसर्वकारः "राष्ट्रं प्रथमम्" इति दृष्टिकोणेन कार्यं करोति, प्रत्येकस्य क्षेत्रस्य प्रत्येकस्य नागरिकस्य च विकासे ध्यानं केन्द्रीकरोति। श्रीमोदी राजस्थानसर्वकारस्य विविधविभागेषु प्रायः चतुःपञ्चाशत्सहस्र (५४,०००) नवनियुक्तेभ्यः युवकेभ्यः नियुक्तिपत्राणि अपि दत्तवान्।

## सामूहिकहिंसा-मिथ्यासङ्घट्ट-भित्तिभञ्जकशासनानां विरोधे भाकपा (माले) दलस्य प्रतिरोधप्रदर्शनम्




**हिमसंस्कृतवार्ता, राघव नाथ झा मसौढी, पटना।** राज्यव्यापि-प्रतिरोध-दिवसस्य अवसरे भारतीय-कम्युनिष्ट-पार्टी (माले) दलस्य नेतृत्वे सामूहिकहिंसायाः, मिथ्या-सैन्यसङ्घट्टानां, भित्तिभञ्जक-शासनस्य तथा आरक्षक-दमनस्य विरोधे एका विशाला प्रतिरोधयात्रा आयोजिता। तत्पश्चात् तारेगणा-रेलस्थानकस्य प्राङ्गणे एका जनसभा सम्पन्ना।

भाकपा (माले) दलस्य राज्यसमितिसदस्यः, पाटलिपुत्र-ग्रामीण-पश्चिम-जनपदस्य कार्यालयसचिवः च सहचर-कमलेशकुमारः सभां सम्बोधयन् अवदत् यत्— "बिहारराज्ये सुशासनस्य स्थाने सम्प्रति आरक्षक-शासनं, भित्तिभञ्जक-शासनं तथा मिथ्या-सङ्घट्ट-प्रवृत्तिः वर्धमाना दृश्यते। सामूहिकहिंसा, जात्याधारितहिंसा, दलित-पिछडावर्गीय-जनानां उपरि आक्रमणाणि च लोकतन्त्रस्य संविधानस्य च विघातकानि सन्ति।"ते अग्रे अवदन् यत् सर्वेभ्यः पीडितेभ्यः समानन्यायः प्रदातव्यः। अपराधस्य मूल्याङ्कनं जात्याधारेण न करणीयम्। राज्ये विधिव्यवस्थायाः संरक्षणं शासनस्य परमं दायित्वम् अस्ति।

अयं प्रतिरोध-मार्चः मसौढीस्थित-'शहीद-ए-आज़ाद-भगतसिंह'-कार्यालयतः आरभ्य आरक्षकालय-मार्गेण, मुख्यमार्गेण, रेलस्थानक-मार्गेण च गत्वा तारेगणा-रेलस्थानक-प्राङ्गणे सभारूपेण परिणतः अभवत्।

अस्य कार्यक्रमस्य आयोजने मसौढी-धनरुआ-प्रखण्डयोः भाकपा (माले) कार्यकर्तारः सक्रियतया सहभागिनः अभवन्। कार्यक्रमे राकेशः, अकलुपासवानः, नागेश्वरपासवानः, रिंकूदेवी, श्रीभगवानपासवानः, धर्मशीलादेवी, वाजनपासवानः, विद्यापासवानः, जितेन्द्ररामः, शशिरञ्जनकुमारः, सन्दीपपासवानः, गुड्डू-अन्सारी, अख्तर-अन्सारी, कमलेश-सावः, बिटेश्वर-यादवः इत्यादयः बहवः जनाः उपस्थिताः आसन्।

## भारतसर्वकारेण 'टेलीग्राम' संस्थायाः कृते आधिकारिकी सूचना प्रसारिता

भारतसर्वकारेण 'टेलीग्राम' संस्थायाः कृते आधिकारिकी सूचना प्रसारिता। व्यापकरूपेण प्रवृत्तं चलच्चित्र-वंचनावृत्तमाधृत्य भारत-सर्वकारेण 'टेलीग्राम' संस्थायाः कृते आधिकारिकी सूचना प्रसारिता। आधकारिक स्रोतेभ्यः प्राप्तानुसारं, प्रशासनेन टेलीग्राम-संस्था वंचना-प्रसारितेभ्यः चलच्चित्रेभ्यः ओटीटी विषयवस्तुभ्यः सद्यः प्रतिबन्धात्मकं पदक्षेपं वोढुं समादिष्टा। अस्य संवाद-मञ्चस्य प्रबन्धकाः आगामिषु पञ्चदशदिनेषु स्वीकृत कार्याचरणस्य प्रतिवेदनं प्रेषितुं निर्दिष्टाः।

# मादकद्रव्याणां याचनां न्यूनीकर्तुं सामाजिक-न्यायाधिकारितामन्त्रालयेन राष्ट्रियकार्ययोजना आरब्धा



सामाजिकन्याय-एवं-अधिकारिता-मन्त्रालयेन मादकद्रव्याणां याचनां न्यूनीकर्तुं एका राष्ट्रिया कार्ययोजना आरब्धा अस्ति। इदं एकं व्यापकं तन्त्रम् अस्ति यस्य उद्देश्यं निवारणम्, जागरूकताजननम्, क्षमतानिर्माणम्, उपचारः, पुनर्वासः, सामाजिक-एकीकरणं च अस्ति। केन्द्रीय-सामाजिकन्याय-एवं-अधिकारिता-मन्त्री डॉ. वीरेन्द्र कुमारः अकथयत् यत् एतासां योजनानाम् उद्देश्यं जागरूकता-उपचार-पुनर्वास-सामाजिकएकीकरणानां माध्यमेन मादकद्रव्याणां दुरुपयोगस्य निवारणम् अस्ति। सः मादकद्रव्याणां दुरुपयोगस्य सम्मुखीकरणाय केन्द्र-राज्य-केन्द्रशासितप्रदेशेभ्यः, सम्बद्धमन्त्रालयेभ्यः, नागरिकसमाजात्, जनसामान्यात् च सामूहिक-समन्वित-कार्याचरणस्य आह्वानं कृतवान्। डॉ. कुमारः अवदत् यत् मन्त्रालयेन २०१९ तमे वर्षे कृतेन राष्ट्रव्यापि-सर्वेक्षणेन ज्ञातं यत् देशे सप्तकोटिभ्यः अधिकाः जनाः मादकद्रव्यसेवनेन प्रभाविताः आसन्, यत् अधिकजागरूकतायाः, सहानुभूत्याः, जनकेन्द्रित-हस्तक्षेपाणां च आवश्यकतां प्रकटयति।

## उपचार-पुनर्वास-जालस्य (नेटवर्क) विस्तारः जनविश्वासश्च

सामाजिकन्याय-एवं-अधिकारिता-विभागस्य सचिवः सुधांश पन्तः अवदत् यत् मन्त्रालयेन स्वस्य उपचार-पुनर्वास-जालस्य विस्तारं कुर्वता देशे सप्तशतम् अष्टषष्टिः (७६८) व्यसनमुक्ति-पुनर्वास-केन्द्राणि यावत् प्राप्यता साधिता। सः अकथयत् यत् उपचारम् इच्छुकानां जनानां सङ्ख्यायां २९४ प्रतिशतं यावत् वृद्धिः अभवत्, या २०२० तमे वर्षे २ लक्ष ८ सहस्रेभ्यः (२,०८,०००) प्रवर्ध्य २०२५ तमे वर्षे ८ लक्ष २० सहस्रेभ्यः (८,२०,०००) अधिका जाता, इयं वृद्धिः एतासु सेवासु जनसामान्यस्य वर्धमानं विश्वासं दर्शयति।

**भारतवर्षे यकृत्-महामर्याः (लिवर महामारी) तथा च 'टाइप-2' मधुमेहस्य सम्मुखीकरणाय राष्ट्रियाभियानस्य आह्वानम्**

विज्ञान-प्रौद्योगिकी-मन्त्री जितेन्द्र सिंहः भारतवर्षे यकृत्-महामर्याः (लिवर की महामारी) तथा च 'टाइप-2' मधुमेहस्य सम्मुखीकरणाय एकस्य राष्ट्रिय-मिशन-इत्यस्य (राष्ट्रियाभियानस्य) आरम्भार्थम् आह्वानं कृतवान्। नवदिल्ल्यां 'लिवर एण्ड मेटाबोलिक डिज़ीज़ नेटवर्क' इत्यस्य तृतीय-वार्षिकोत्सवे डॉ. सिंहः अवदत् यत् एते रोगाः सम्प्रति पूर्वस्याः तुलनायां न्यूनवयस्केषु जनेषु अपि दृश्यन्ते। सः अकथयत् यत् देशस्य आनुवंशिक-संरचनायाः , उदरस्य परितः वसायाः अधिकसमस्यायाः तथा च भारतीयानां विशिष्ट-शारीरिक-संरचनायाः कारणात् जनेषु मधुमेहस्य, मेदस्वि-यकृतः (फैटी लिवर), हृद्रोगस्य च सङ्कटं अधिकं वर्तते। डॉ. सिंहः अवदत् यत् वैज्ञानिक-प्रगत्या सह व्यापकरूपेण जन-जागरूकतया व्यवहारे परिवर्तनेन च अस्याः आव्हानात्मिकायाः स्थितेः सम्मुखीकरणं कर्तुं शक्यते।

# देशस्य रक्षा-निर्यातः ३८ सहस्रकोटिरूप्यकाणां कीर्तिमान-स्तरं प्राप्तवान् - रक्षामन्त्री राजनाथसिंहः



रक्षामन्त्री राजनाथसिंहः अवदत् यत् देशस्य रक्षा-निर्यातः ३८ सहस्रकोटि (३८,००० कोटि) रूप्यकाणां कीर्तिमान-स्तरं प्राप्तवान् अस्ति। नवदिल्ल्यां एकस्मिन् निजी-कार्ये श्रीसिंहः अकथयत् यत् वित्तवर्षे २०१३-१४ तमे रक्षा-निर्यातः ६८६ कोटिरूप्यकाणां आसीत्, यः सम्प्रति प्रायः ५७ गुणितं (५७ गुना) वर्धितः अस्ति। सः अवदत् यत् इयं वृद्धिः रक्षा-विनिर्माणे प्रौद्योगिकी-क्षेत्रे च भारतस्य महत्त्वपूर्णां प्रगतिम् तथा च 'मेक इन इण्डिया' रक्षा-मञ्चेषु (प्लेटफॉर्म) वर्धमानं वैश्विक-विश्वासं रेखाङ्कयति।

## रक्षा-उत्पादने अभूतपूर्वा वृद्धिः अन्याः विनिर्माण-उपलब्धयः च

रक्षामन्त्रिणा कथितं यत् वित्तवर्षे २०२५-२६ तमे वार्षिकं रक्षा-उत्पादनम् अपि सर्वकालिक-उच्चतम-स्तरं प्राप्तवान्। इदं १ लक्ष ७८ सहस्रकोटि (१,७८,००० कोटि) रूप्यकेभ्यः अधिकं वर्तते, यत् २०१४-१५ तमस्य वर्षस्य तुलनायां प्रायः त्रिविधं अधिकम् अस्ति। भारतस्य व्यापक-विनिर्माण-उपलब्धीनां विषये श्रीसिंहः चलदूरभाष-उत्पादनस्य विस्तारस्य, स्वयंचलितवाहन-निर्याते वृद्धेः, स्वदेशी-रेल्यान-इञ्जन (लोकोमोटिव) उत्पादनस्य तथा च 'मेक इन इण्डिया' इति प्रयासस्य अन्तर्गतं अङ्कीय-आधारभूतसंरचनायाः (डिजिटल अवसंरचना) सुदृढीकरणस्य उल्लेखं कृतवान्।

## कार्यसंस्कृतौ परिवर्तनं राष्ट्रियसुरक्षा च

गते एकस्मिन् दशके देशस्य प्रगतेः विषये श्रीसिंहः अवदत् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे सर्वकारेण न्यूनताः दूरीकृताः, अवसराणां विस्तारः कृतः, कार्यसंस्कृतौ च परिवर्तनं विहितम्। जम्मू-काश्मीरराज्यात् ३७० तमस्य अनुच्छेदस्य निरस्तीकरणविषये तथा च देशे नक्सलवादस्य उन्मूलनाय सर्वकारस्य निरन्तरप्रयासाणां सन्दर्भे श्रीसिंहः अकथयत् यत् एते मन्त्रालयानां प्रयासः तासाम् आव्हानानां सम्मुखीकरणस्य सङ्कल्पस्य उदाहरणानि सन्ति, याः कदाचित् असम्भवाः मन्यन्ते स्म।

# मूल्यस्थिरीकरण-कोषाय पलाण्डोः (प्याज) क्रयमूल्ये १३ प्रतिशतं वर्धितम् - सर्वकारः



सर्वकारेण मूल्यस्थिरीकरण-कोषाय (बफर स्टॉक) पलाण्डोः (प्याज) क्रयमूल्ये १३ प्रतिशतं यावत् वृद्धिः कृता अस्ति। अस्य क्रयमूल्यं प्रतिचतुष्कं (प्रति क्विंटल) १,८७५ रूप्यकेभ्यः वर्धित्वा सम्प्रति २,१२५ रूप्यकाणि सञ्जातम्। उपभोक्ता-मामले, खाद्य-एवं-सार्वजनिक-वितरण-मन्त्रालयेन ज्ञापितं यत् इदं संशोधितं क्रयमूल्यम् अद्यतनेन दिनाङ्केन प्रभावी अभवत्। मन्त्रालयानुसारं अनेन पलाण्डु-उत्पादक-कृषकेभ्यः श्रेष्ठतरः लाभः प्राप्स्यते, सहैव बफर-क्रय-प्रयासेष्वपि सहायता मिलिष्यति। सर्वकारस्य मूल्यस्थिरीकरण-कोषाय 'भारतीय राष्ट्रीय कृषि सहकारी विपणन संघ लिमिटेड' (NAFED) तथा च 'भारतीय राष्ट्रीय सहकारी उपभोक्ता संघ लिमिटेड' (NCCF) इत्येतयोः माध्यमेन पलाण्डोः क्रयप्रक्रिया निरन्तरं प्रचलति।

## पलाण्डु-उत्पादनं भण्डारणं च

कृषि-एवं-कृषक-कल्याण-विभागस्य वर्ष २०२५-२६ तमस्य द्वितीय-अग्रिम-अनुमानानुसारं, पलाण्डोः उत्पादनं ३०७ लक्ष (३०.७ मिलियन) मीट्रिक-टन् इत्यतः अधिकं भवितुम् अनुमानितम् अस्ति। मन्त्रालयेन सूचितं यत् महाराष्ट्र-मध्यप्रदेश-गुजरातराज्येषु वर्तमानः भण्डारः (स्टॉक) पर्याप्तः वर्तते, सम्प्रति च पलाण्डोः कापि न्यूनता (कमी) नास्ति। देशे पलाण्डोः अखिलभारतीयं औसत-प्रस्फुट-मूल्यं (खुदरा मूल्य) ३१ रूप्यकाणि प्रति किलोग्राम अस्ति। पलाण्डोः निर्यातः सामान्यः वर्तते, अस्मिन् वर्षे जून-मासे प्रायः सार्ध-एक-लक्ष (१,५०,०००) मीट्रिक-टन् परिमितस्य पलाण्डोः निर्यातः कृतः।

# स्वामी विवेकानन्दस्य पुण्यतिथौ तस्मै सादरं श्रद्धाञ्जलिं समर्पितवन्तौ उपराष्ट्रपतिः सी. पी. राधाकृष्णन् प्रधानमन्त्री नरेन्द्रमोदी च

उपराष्ट्रपतिः सी. पी. राधाकृष्णन् प्रधानमन्त्री नरेन्द्रमोदी च स्वामी विवेकानन्दस्य पुण्यतिथौ तस्मै सादरं श्रद्धाञ्जलिं समर्पितवन्तौ। सामाजिकान्तर्जालीय सन्देशे उपराष्ट्रपतिना राधाकृष्णन् इत्यनेन स्वामी विवेकानन्दः कश्चन महान् देशभक्तः, दार्शनिकः, आध्यात्मिक-द्रष्टा चेति व्यपदिष्टः। तेन प्रोदीरितं यत् स्वामी विवेकानन्देन भारतस्य सभ्यतामूलक चेतनायाः पुनर्जागरणं विहितं सहैव देशस्य सनातनज्ञानं कृत्स्नं हि विश्वं प्रति प्रसारितम्। उपराष्ट्रपतिना सबलं विज्ञापितं यत् स्वामिनः आत्मविश्वासपूर्णस्य, प्रबुद्धस्य, करुणापूर्णस्य च भारतस्य परिकल्पना अद्यापि राष्ट्रस्य विकासयात्रायाः मार्गं दिशति। सः आशां प्रकटितवान् यत् स्वामिविवेकानन्दस्य आदर्शाः सर्वेषां कृते निष्ठापूर्वकं सेवायै, उत्कृष्ट चारित्र्य-निर्माणाय, राष्ट्र-निर्माणे दृढ-सङ्कल्पबद्धतायै अविरतं प्रेरयिष्यन्ति। प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रतिपादितं यत् भारतस्य संस्कृतिं, आध्यात्मिकताम्, राष्ट्रिय-चेतनां च वैश्विकपटले प्रतिष्ठापयितुं स्वामी विवेकानन्दस्य यत् अवदानं वर्तते, तत् अनुपमम् अस्ति। श्रीमोदी अब्रवीत् यत् स्वामिनः प्रखरा बुद्धिः सत्प्रेरकाः विचाराश्च अद्यापि कोटिशः यूनां कृते पथप्रदर्शकाः सन्ति। तेन अग्रे गदितं यत् स्वामिविवेकानन्दस्य आध्यात्मिकोपदेशाः 'विकसित-भारतस्य' सङ्कल्पसिद्धये राष्ट्राय एकां विनूत्नाम् ऊर्जा दिशं च प्रदास्यन्ति ।

# हिमाचल-काङ्ग्रेसेन सङ्घटनस्य दृढीकरणाय निर्मितं मार्गचित्रम्, राज्ये सद्यः एव भविष्यति मन्त्रिमण्डलविस्तारः




**हिमसंस्कृतवार्ताः — शिमला ।** हिमाचलप्रदेश-काङ्ग्रेसस्य नूतन-कार्यकारिण्याः सङ्घटनात् परं शनिवारवासरे राजीवभवने आयोजितायाम् प्रथमायां सामान्यसभायां (आम सभा) सङ्घटनं मतदानकेन्द्रस्तरं (बूथ स्तर) यावत् सुदृढीकर्तुं आगामि-राजनैतिक-रणनीतेः उपरि च विमर्शः कृतः। उपवेशने काङ्ग्रेसस्य हिमाचलप्रभारिणी रजनीपाटिलमहोदया सद्यः एव प्रदेशे मन्त्रिमण्डलविस्तारस्य स्पष्टं सङ्केतं दत्तवती। तया ज्ञापितं यत् १६ तथा १७ जुलाई दिनाङ्कयोः धर्मशालायां भविष्यति महत्त्वपूर्ण-उपवेशने सङ्घटन-महासचिवस्य के. सी. वेणुगोपालस्य उपस्थितौ मन्त्रिमण्डलविस्तारं समेतान् बहून् प्रमुखाशयान् अधिकृत्य विमर्शः भविष्यति। माध्यमैः (मीडिया) साकं सम्भाषणे रजनीपाटिलमहोदया अवदत् यत् काङ्ग्रेसदलस्य ध्यानं सङ्घटनं भूमितलं (जमीनी स्तर) यावत् सुदृढीकर्तुं वर्तते। राममन्दिर-धनसङ्ग्रहप्रकरणं प्रति भारतीयजनतापक्षस्य (भाजपा) उपरि प्रहारं कुर्वती रजनीपाटिलमहोदया अवदत् यत् काङ्ग्रेसदलं निष्पक्षां गभीराञ्च अन्वेषणं याचते। तस्याः कथनम् आसीत् यत् भाजपादलेन राममन्दिरनाम्ना जनेभ्यः मतं (वोट) याचितं, अतः अधुना सम्मुखम् आगतानाम् आरोपाणां सत्यता अपि प्रकटिता भवेत्। तथा तैलवर्गे (पेट्रोल) एथनॉल-मिश्रणस्य विषयं प्रत्यपि चिन्ता प्रदर्शिता, उक्तञ्च यत् सर्वकारेण अस्य प्रभावाणाम् गम्भीरम् अध्ययनं कृत्वा आवश्यकाः उपायाः करणीयाः। उपवेशने सङ्घटनस्य सुदृढीकरणं, राजनैतिक-रणनीतिः, प्रदेशस्य समसामयिकाः विषयाः च अधिकृत्य विस्तरेण चर्चा विहिता।

# हिमाचले निरन्तरम् एकसप्ताहं यावत् वर्षिष्यन्ति मेघाः, पञ्चसु मण्डलेषु दिनद्वयं यावत् वृष्टेः 'नारङ्गसचेतना'

**हिमसंस्कृतवार्ताः — शिमला ।** हिमाचलप्रदेशे निरन्तरम् एकसप्ताहं यावत् मेघवर्षणस्य सम्भावना वर्तते। राज्यस्य पञ्च मण्डलानां कृते दिनद्वयस्य प्रचण्डवृष्टेः नारङ्ग-सचेतना प्रसारिता अस्ति। गतेषु २४ होरासु कसौली-क्षेत्रे ५५.०, मनाल्यां ५१.०, भटियाते ४५.३, धर।मपूरे ४२.४, सराहन-क्षेत्रे ३९.५, कोटखाई-क्षेत्रे ३१.१, सलूण्यां २६.२, जुब्बड़हट्ट्यां २५.६, जोत-चम्बायां २१.२, भरमौरे १६.२ तथा च भरवाईं-क्षेत्रे १४.० मिलिमीटर (mm) वृष्टिः अङ्किता। राजधान्या शिमलाया साकम् अन्येषु बहुषु भागेषु स्थगं-स्थगं वृष्टिः प्रचलति।

### निर्माणस्य कतिपयहोरासु एव ध्वस्ता जाता रोध-भित्तिः

अपरपक्षे, चुराह-उपमण्डलस्य 'कल्हेल-बंजली-रैला' मार्गस्य 'थलान' इत्यस्य 'कुठलु' स्थाने लोकनिर्माणविभागेन (PWD) शुक्रवासरे निर्मिता रोध-भित्तिः (डंगा) चिररात्रौ ध्वस्ता जाता। सूचनानुसारम् अस्मिन् स्थाने मार्गस्य क्षतिग्रस्तत्वात् गमनागमनं बाधितं भवति स्म। बस-यानयोग्यं मार्गं पुनरुद्धर्तुं लोकनिर्माणविभागेन अत्र रोध-भित्तेः निर्माणं कृतम् आसीत्। ग्रामीणानां कथनमस्ति यत् अत्र कङ्क्रीट-माध्यमेन सुदृढः रोध-भित्तिः स्थापनीया, येन मार्गः दीर्घकालं यावत् सुरक्षितः तिष्ठेत्, जनानां गमनागमने च कापि बाधा न भवेत्।

### एतेषां मण्डलानां कृते प्रचण्डवृष्टेः सतर्कता

ऋतुविज्ञानकेन्द्र-शिमलायाः अनुसारं राज्ये १० जुलाई दिनाङ्कं यावत् वृष्टेः क्रमः प्रचलिष्यति इति पूर्वानुमानं वर्तते। ६, ७ तथा ८ जुलाई दिनाङ्केषु राज्यस्य अधिकांशभागेषु मन्दतः मध्यमा वृष्टिः भवितुं शक्नोति। साकमेव ६ तथा ७ जुलाई दिनाङ्कयोः केषुचित् स्थानेषु प्रचण्डतः अतिवृष्टिः, ८ जुलाई दिनाङ्के च प्रचण्डवृष्टेः 'नारङ्गसचेतना' अस्ति। ४, ५, ९ तथा १० जुलाई दिनाङ्केषु राज्यस्य बहुषु क्षेत्रेषु मन्दतः मध्यमा वृष्टिः भवितुं सम्भावना अस्ति। ४, ५ तथा ९ जुलाई दिनाङ्कयोः केषुचित् स्थानेषु वृष्टेः पीत-सतर्कता वर्तते।६ जुलाई दिनाङ्काय मण्डी-सिरमौरमण्डलयोः प्रचण्डतः अतिवृष्टेः 'नारङ्गसचेतना' प्रसारिता अस्ति। ७ जुलाई दिनाङ्के अपि चम्बा-काङ्गड़ा-सिरमौरमण्डलानां कृते नारङ्ग-सचेतना अस्ति। शिमला-समेतेषु अन्येषु मण्डलेषु पीतसचेतना प्रसारिता। सोलन-सिरमौर-बिलासिपुर मण्डलानां कृते पीतसचेतना अस्ति।

### जुलाई मासस्य दिनत्रये सामान्यात् १०६% अधिका वृष्टिः

अस्मिन् ऋतुकालीनवृष्टिकाले (मानसून-सीजन) १ तः ३ जुलाई पर्यन्तं राज्ये सामान्यात् १०६% अधिका वृष्टिः अङ्किता। अस्या अवधेः कृते १५ मिलिमीटर वृष्टिः सामान्या मन्यते स्म, परन्तु वास्तवतः ३०.९ मिलिमीटर वृष्टिः संजाता। बिलासपुरे सामान्यात् ३७%, चम्बायां १०७%, हमीरपुरे ४५%, काङ्गड़ायां १२५%, किन्नौरे ४२३%, कुल्लू-क्षेत्रे १९५%, मण्ड्यां ४६%, शिमलायां ११७%, सिरमौरे १४३%, सोलन-क्षेत्रे १४Map तथा च ऊना-मण्डले १३०% अधिका वृष्टिः अङ्किता। लाहौल-स्पीतौ सामान्यात् ३०% न्यूना वृष्टिः अभवत्।

### प्रावृट्ऋतौ स्थानीयप्रशासनम् आपदाप्रबन्धन-समूहाः च पूर्णतया सावधानाः - नरेशचौहानः

राज्ये मानसूनकाले आपदाप्रबन्धनस्य सज्जतां सतर्कतां च अधिकृत्य मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खू महोदयस्य प्रधानपरामर्शदात्रा (मीडिया) नरेशचौहानेन कथितम्— 'अस्माकं सर्वकारः, मण्डलाप्रशासनं, लोकनिर्माणविभागः, विद्युत्विभागः, स्थानीयप्रशासनम् आपदाप्रबन्धनदलानि च श्च पूर्णरूपेण सजगाः सन्ति। वयम् २०२३ तमवर्षस्य भीषणविपद् तथा २०२५ तमवर्षस्य जटिलानां स्थितीनां सम्मुखीकरणं कृतवन्तः। अतः, प्रत्येकः विभागः सज्जः तिष्ठति, कस्यामपि घटनायां सत्यां सद्यः प्रक्रमं करोत्। मार्गाः शीघ्रतिशीघ्रं उद्घाट्यन्ते, आवश्यकीः सेवाः च विना कापि विलम्बं पुनरुद्ध्रियन्ते... अहं पर्यटकेभ्यः प्रार्थयितुम् इच्छामि यत् शिमला, मनाली, धर्मशाला, डलहौजी, कसौली सदृशानि स्थानानि सुरक्षितानि सन्ति। जनैः आगन्तव्यं, हिमाचलप्रदेशस्य सुखदवातावरणस्य मानसूनस्य च सौन्दर्यस्य आनन्दः ग्रहीतव्यः। केवलं अतिवृष्टिकाले तैः नदीभ्यः, उपनदेभ्यः, सङ्कटपूर्णस्थानेभ्यश्च दूरे स्थातव्यम्। राज्यस्य यात्रां न कर्तुं किमपि कारणं नास्ति।'

# सी.बी.आई. इत्यस्य महती प्रक्रिया, मनाल्यां ९३ सहस्रम् उत्कोचं गृह्णन् सेनायाः गैरिसन अभियन्ता बन्दीकृतः




**हिमसंस्कृतवार्ताः- मनाली।** हिमाचलप्रदेशस्य मनाल्याः 'बहाङ्ग' क्षेत्रे केन्द्रीय- अन्वेषण- ब्यूरो (सी.बी.आई.) शिमला-शाखया भ्रष्टाचारविरोधिनीं महतीं प्रक्रियां प्रचाल्य 'मिलिट्री इंजीनियरिंग सर्विसेज' इत्यस्य सहायक- गैरिसन-अभियन्ता के. के. सोनी (उत्तरप्रदेशनिवासी) ९३ सहस्ररूप्यकाणाम् उत्कोचं प्रत्यक्षतः गृह्णन् बन्दीकृतः। आरोपी-अधिकारिणः उपरि कस्यचित् कर्माध्यक्षस्य प्रायः ३० लक्षरूप्यकाणां प्रलम्बितं देयकं स्वीकारयितुं पूर्णप्रदानस्य प्रतिशतं त्रयम् (३%) उत्कोचरूपेण याचितुम् आरोपः अस्ति। सूचनानुसारं, कर्माध्यक्षेण उत्कोचयाचनायाः सङ्केतः सी. बी. आई. संस्थायै दत्तः आसीत्। उपालम्भस्य प्रमाणीकरणोत्तरं संस्थया सुनियोजितं पाश-प्रक्रमं ('ट्रैप ऑपरेशन') सज्जं कृतम्। निर्धारित-योजनानुसारं यथा एव आरोपी-अधिकारिणः ९३ सहस्ररूप्यकाणाम् उत्कोचं स्वीकृतवान्, तदैव सी. बी. आई. दलेन सः घटनास्थले एव बन्दीकृतः। एषा प्रक्रिया सी.बी.आई. शिमला-शाखायाः आरक्षक-अधीक्षकस्य राजेशचहलस्य नेतृत्वे अतिरिक्त- आरक्षक- अधीक्षकेण सुमितपालेन उप- आरक्षक- अधीक्षकेण गोविन्दसोलङ्किना च साकं विहिता। बन्दीकरणात् सद्यः परमेव सी. बी. आई. संस्थया आरोपिणः सर्वकारीय-आवासे अपि मर्मान्वेषणं कृतम्।सायङ्कालं यावत् प्रवृत्तायां अन्वेषण-प्रक्रियायां दलेन शङ्कास्पदा नकदीराशिः, महत्त्वपूर्णाः सर्वकारीय- प्रलेखाः अन्याः पञ्जिकाश्च (रिकॉर्ड) स्वाधीनाः कृताः, येषाम् अन्वेषणं प्रचलति। संस्था अधुना एतदपि ज्ञात्वा प्रयतते यत् आरोपिणः एषा उत्कोचखोरी कस्यचित् बृहत्-तन्त्रस्य (नेटवर्क) भागः तु नासीत्। एतादृशात् संवेदनशीलात् रक्षाप्रतिष्ठानेन सम्बद्धात् कार्यालयात् उत्कोचप्रकरणस्य सम्मुखम् आगमनेन सुरक्षा- प्रशासनिक- मण्डलेषु अपि महान् सङ्क्षोभः संजातः। सी.बी.आई. संस्थया आरोपिणः विरुद्धं भ्रष्टाचारनिवारण-अधिनियमस्य अन्तर्गतं प्रकरणं पञ्जीकृतम्। संस्था अधुना आरोपिणा सह पृच्छां करोति तस्य वित्तीय-व्यवहाराणां, सम्पत्तीनां तथा च अन्येषाम् आनुषङ्गिक-अधिकारिणां भूमिकायाः अपि अन्वेषणं विधीयते।

# भारत-इस्राएलदेशयोः मध्ये सञ्जातः द्विपक्षीय-निवेश-संधिः



भारत-इस्राएलदेशयोः मध्ये सञ्जातः द्विपक्षीय-निवेश-संधिः अद्यारभ्य अर्थात् जुलाई मासस्य पञ्च दिनांकात् आधिकारिकरूपेण प्रवृत्तो जातः। अयं हि ऐतिहासिकः सन्धिः गतवर्षे सितम्बरमासे नवदेहल्यां हस्ताक्षरितं गतः। केन्द्रीय-वित्तमन्त्रालयः प्रत्यपादयत् यत् अयं द्विपक्षीय निवेश-संधिः उभयोः राष्ट्रयोः आर्थिक-सम्बन्धानां सुदृढीकरणाय अथ एकं सुरक्षितं, पूर्वानुमानयोग्यं निवेश-वातावरणं निर्मातुमेकं ऐतिहासिकं चरणं वर्तते। मन्त्रालयेन गदितं यत् संधेः आधारेण परिसीम्नि निवेश-गतिविधिषु प्रवर्धनेन सह भारत-इस्राएलदेशयोः मध्ये रणनीतिक-आर्थिक-सहभागिता अपि गभीरा भविता।

# भाजपा-दलस्य मिथ्याप्रचारस्य प्रखर-उत्तरं दास्यति काङ्ग्रेसदलम्, २०२७ तमे वर्षे भाजपा-विधायकानां सङ्ख्या भूयः न्यूनीभविष्यति



**हिमसंस्कृतवार्ताः — शिमला ।**
एकदिवसीय-देहली-प्रवासात् हिमाचलं प्रत्यागतः प्रदेशमुख्यमन्त्री सुखविन्दरसिंहसुक्खूः अवदत् यत् भारतीयजनतापक्षः (भाजपा) २०२७ तमे वर्षे सत्तायां न आगमिष्यति तेषां विधायकानां सङ्ख्या अपि भूयः न्यूनीभविष्यति। मुख्यमन्त्रिणा कथितं यत् काङ्ग्रेसदलेन राज्ये भारतीयजनतापक्षस्य मिथ्याप्रचारस्य कथं प्रखर-उत्तरं दातव्यम्, अस्मिन् सन्दर्भे प्रदेशाध्यक्षेण विनयकुमारेण एषा दलस्य उपवेशनप्रक्रिया आहूता अस्ति। मुख्यमन्त्रिणा शिमला-स्थित-राजीवभवने काङ्ग्रेसदलस्य राज्यस्तरीय-उपवेशनकाले माध्यमैः (मीडिया) साकं सम्भाषणे प्रतिपादितं यत् काङ्ग्रेसस्य नूतन-प्रदेशाध्यक्षेण साकं सर्वेषु मण्डलेषु नूतनकार्यकारिण्याः सङ्घटनं संजातम् अस्ति। काङ्ग्रेसदलस्य सामान्यसभायां (जनरल हाउस) राज्यस्य सर्वेभ्यः मण्डलेभ्यः अध्यक्षाः, मन्त्रिणः, सर्वे खण्ड-अध्यक्षाश्च सम्मिलिताः अभवन्। भाजपादलस्य 'मिशन रिपीट' इति विषये पृष्टस्य प्रश्नस्य उत्तरे मुख्यमंत्री सुक्खुः महोदयेन उक्तं यत् कोऽपि मिशन-रिपीट् न भवति, एतत् सर्वं जनता एव निर्धारयति।

### दलाभ्यन्तरे वैचारिकभिन्नता अस्ति, मनोमालिन्यम् नास्ति

दलस्य आन्तरिकभागे बागवानीमन्त्रिणा जगत्सिंहनेगिना उत्थापितस्य प्रश्नस्य उपरि मुख्यमन्त्रिणा प्रोक्तं यत् काङ्ग्रेसदले कोऽपि मनोमालिन्यम् नास्ति। जगत्सिंहनेगी मन्त्री वर्तते। तेन स्वकीयाः केचन विचाराः उपस्थापिताः। राष्ट्रियस्तरे महासचिवः अस्ति। तेन कथितं यत् विचारेषु भिन्नता भवति, मनोमालिन्यम् न भवति। निश्चितरूपेण तेन सह उपविश्य वार्ता विधास्यते। अस्मिन् सन्दर्भे रणनीतिः सज्जीकरिष्यते। तेन स्पष्टीकृतं यत् मन्त्रिणा उच्चाधिकारिणाम् (आलाकमान) उपरि प्रश्नाः न उत्थापिताः, तेन केवलं स्वविचाराः प्रकटीकृताः। मन्त्रिमण्डलविस्तारविषये मुख्यमन्त्रिणा कथितं यत् मन्त्रिमण्डलविस्तारः भवितव्यः एव, परन्तु एषः विस्तारः कदा भविष्यति, एतत् उच्चाधिकारिणः (हाईकमान) एव निश्चितं कुर्वन्ति। मुख्यमंत्री. महोदयेन उक्तं यत् राज्यमन्त्रिमण्डलस्य एकं पदं रिक्तं वर्तते, तस्य पूरणम् अपि आवश्यकम् अस्ति। १६ तथा १७ दिनाङ्कयोः अस्माकं राजनैतिकविषयसमितिः ('पॉलिटिकल अफेयर कमेटी') इत्यस्याः उपवेशनं वर्तते। यदि वातावरणं स्वच्छं स्थास्यति, तदैव उपवेशनं सुनिश्चितं विधास्यामः।

### धनचौर्यं कुर्वन्तः न क्षन्तव्याः

राममन्दिरस्य धनसङ्ग्रह-चौर्यप्रकरणे (चढ़ावा चोरी के मामले पर) मुख्यमन्त्रिणा प्रतिपादितं यत् एषः अतीव गम्भीरः विषयः अस्ति। श्रीरामः अस्माकम् आराध्यः अस्ति। यदा राममन्दिरस्य प्राणप्रतिष्ठा अभवत्, तदा अस्माकं सर्वकारेण पूर्णदिवसस्य अवकाशः घोषितः आसीत्। एतत् निश्चितरूपेण निन्दनीयं वर्तते, अस्माकं दलस्य च मान्यता अस्ति यत् भगवतः नाम्ना धनचौर्यं कुर्वन्तः जनाः कदापि न क्षन्तव्याः ।



# “दीपः” [३६]

एकः दीपोऽस्ति। तस्मिन् दीपे भृशं तैलम् आसीत्। दीपस्य वर्तिकाऽपि उत्तमा। तस्य प्रकाशः सर्वत्र प्रसृता। सर्वे जनाः वदन्ति कियान् उत्तमः प्रकाशः। सम्पूर्णः प्रकोष्ठः प्रकाशेन व्याप्तः। स्वस्तुतिं श्रुत्वा दीपकः अभिमानी अभवत्। सः अवदत्- प्रकोष्ठस्य का कथा? मम प्रकाशः तु जगति प्रसृतः, अहं जगते प्रकाशं दातुं समर्थः। अहं सूर्यादपि श्रेष्ठतरः। तस्मिन्नेव क्षणे आगतया वायुलेखया दीपं निष्क्रान्तः। गृहस्वामिनी आगत्य पुनः दीपः प्रज्वालितः। सा दीपम् उक्तवती- रे मूढः! किमर्थं वृथा अहंकारं करोषि? शान्ततया ज्वलतु, शक्यम् अस्ति तावत् प्रकाशं ददातु। सूर्यस्य कथा भिन्ना, चन्द्रिकापि वायोः वातेन न निष्क्रान्ताः तथा च न कोऽपि/ न कश्चित् ताभिः प्रकाशयन्ति। इति ध्यानं रक्षतु।
वृथाभिमानः मास्तु, स्वस्वरूपस्य ज्ञानं आवश्यकम्।

*"अशनं मे वसनं मे जाया मे बन्धुवर्गो मे।*
*इति मे मे कुर्वाणं कालवृको हन्ति पुरुषाजम्"।।*

**डॉ. वर्षा प्रकाश टोणगांवकर,पुणे/ महाराष्ट्रम्**



हिमसंस्कृतवार्ता
असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

# संस्कृतं मधुरं सदा- ५२

रस् धातोः घञ्-प्रत्ययतः उत्पन्नः, आस्वादनार्थकः शब्दः हि 'रसः' इति आख्यायते। रसः प्रकृत्याः एकं महद् अवदानं वर्तते। 'रसो वै सः' इतिवाक्यं जगत्स्रष्टारं परमात्मानं हि सूचयति। समस्तप्रकृतिरपि रसमयी एव। अयं द्वेधा- भौतिकरसः, आध्यात्मिकरसः चेति। भौतिकरसेष्वपि मधुरः, तिक्तः, लावणिकः, अम्लः इत्यादिनानाविधाः रसाः उपलभ्यन्ते। एवम् आध्यात्मिकरसेषु प्रेम, भक्तिः, समर्पणभावः, कारुणिकः इत्यादिनानाविधाः रसाः भवन्ति। एवं साहित्यकलादिषु नवरसाः उपलभ्यन्ते। वस्तुतः अखिलजगद्धि रसकलामयी वर्तते, परमात्मा च मुख्यकलाकारः। प्रत्येकं मनुष्यः, प्रत्येकं जीवः, प्रत्येकं पदार्थः एवं भूत- भविष्य-वर्तमानकालस्य समस्तः मनुष्यसमूहः, सर्वप्राणी, सर्वपदार्थः, समष्टिभूतमिदं विश्वजगत् इत्यादिकस्य यथार्थं तात्त्विकस्वरूपम् उपनिषदा यथा 'सत्यं ज्ञानमनन्तम्' इत्युक्तमस्ति, तथैव तत् 'रसमयम्' इति मत्वा तस्य आस्वादनं कृतं प्राप्यते- 'रसो वै सः' इति। ब्रह्म रसस्वरूपं, परमास्वाद्यं, परमं सौन्दर्यं, माधुर्य-निकेतनं, परमं प्रेमास्पदं च वर्तते। एतत् रसस्वरूपं ब्रह्म हि वैचित्र्यमये जगति विभिन्नरूपेण प्रकटीभूय अनन्त-अनादिकालतः आत्मरमणम्, आत्मविलासम्, आत्मरसास्वादनं च कुर्वदस्ति। विश्वजगति सर्वत्र हि रसविलासः वर्तते, सर्वत्र हि आनन्दक्रीडा। विश्वे यावदपि संघर्षः, जीवनसंग्रामः, घातप्रतिघातः, आपात-बीभत्सपूर्णः, युद्धविग्रहप्रभृति संघटितं भवति, तत्र सर्वत्र हि एकस्य एव अनन्त-चैतन्य-रसस्वरूपस्य ब्रह्मप्रवाहः प्रवाहमानः अस्ति। उपनिषदः दृष्ट्या सर्वं रसमयं, सर्वं सुन्दरं, सर्वञ्च आस्वाद्यं वर्तते। आनन्दरूपे, विज्ञानरूपे, अन्न- भोग्य-जडपदार्थादिरूपे च एकरसामृतसिन्धोः ब्रह्मणः हि आत्माभिव्यक्तिः, आत्मास्वादनञ्च सततं प्रवर्तमानं स्यादिति, शुभम्।




# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। अद्य बहु-विचित्राः वार्ताः मया श्रुताः सन्ति। प्रथमा वार्ता तस्मानिया-द्वीपात् अस्ति। तत्र 'नील' नामकः महासमुद्रगजः क्रीडन् इव मार्गे उपविष्टः। तेन मार्गचिह्नानि नष्टानि कृतानि, मार्गाः च अवरुद्धाः। रक्षापुरुषैः जनाः तस्य समीपे गमनात् निवारिताः।
**नन्दिनी-** अहो! सः समुद्रगजः तु खलु अमर्यादः जातः! वाशिङ्गटन-क्रीडोद्याने अन्यः कश्चन विचित्रमहोत्सवः आयोजितः। तत्र शताधिकैः खलवाटजनैः एकत्र मिलित्वा आत्मगौरवम् अनुभूतम्। तैः खलवाटत्वं न लज्जाविषयः अपितु उत्सवविषयः इति उद्घोषितम्।
**काव्या-** सत्यम्, केशानाम् अभावेऽपि उत्सवः करणीयः एव! इदानीं पश्यतु, फ्लोरिडादेशे आरक्षकाः स्वकीयं द्विचक्रवाहनं त्यक्तवन्तः सन्ति। यतः तस्य वाहनस्य अन्तः एकेन पक्षिणा नीडः रचितः। तत्र द्वौ शावकौ अपि जातौ। अतः आरक्षकैः करुणावशेन तत् वाहनं न चालितम्।
**नन्दिनी-** अतीव कारुणिकं कार्यम् एतत्! आरक्षकाणां प्रशंसा करणीया। अन्तिमा वार्ता आस्ट्रेलियादेशात् अस्ति। तत्र एकेन घोषकेण एतादृशः तीव्रः शब्दः कृतः यः विमानस्य नादसदृशः अभूत्। तेन तीव्र-ध्वनिः उत्पादितः। एवं तेन नूतनः विश्वविक्रमः स्थापितः अस्ति।
**काव्या-** अहो, मम कर्णौ तु तस्य नाम-श्रवणेन एव पीडितौ! अद्य वार्ताः समाप्ताः। श्वः पुनर्मेलिष्यामः।

## आगामिषु चतुर्दिवसेषु मध्यभागे गुजरात-राज्यस्य कतिपयेषु अन्यभागेषु, हरियाणा-पंजाब-राजस्थानप्रान्तानां शिष्टेषु क्षेत्रेषु प्रावृट् स्थितिः भविष्यति-ऋतुविभागः

भारत-ऋतु-विज्ञान-विभागेन विज्ञापितं यत् आगामिषु चतुर्दिवसेषु मध्यभागे गुजरात-राज्यस्य कतिपयेषु अन्यभागेषु, हरियाणा-पंजाब-राजस्थानप्रान्तानां शिष्टेषु क्षेत्रेषु प्रावृट् स्थितिः सर्वथा अनुकूला वर्तते । विभागेनानेन अद्य यावत् मध्यप्रदेश, तटीय कर्नाटक, पूर्व-राजस्थान, तेलंगाना विदर्भक्षेत्रेषु अतिवृष्टेः पूर्वसूचना प्रदत्ता।